श्रीमद्भागवतस्कन्धाध्यायगतविषयानुक्रमणिका ।

प्रथमः स्कंधः । (अधिकारलीला । दक्षिणं चरणकमलम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

अध्यायः

प्रथमं हीनाधिकारप्रकरणम् ।

१ दुष्टकलेरागमनं ज्ञात्वा शौनकादीनां सूतं प्रति तत्तरणोपायप्रश्नः ।
२ एकाग्रमनसा भगवत्कथाश्रवणकीर्तनमेव कलिनिस्तरणोपाय इति निर्णीतम् ।
३ भगवतः स्वस्वचरितोपेताः संक्षेपेण पुरुषाद्यवतारा भागवतार्कोदयश्च ।

द्वितीयं मध्यमाधिकारप्रकरणम् ।

४ आम्नायविभागसदर्थप्रकाशनाय पुराणभारतादिकरणेनापि व्यासस्यापरितोषः ।
५ नारदं प्रति व्यासेन चित्तापरितोषकारणे पृष्टे भगवद्गुणवर्णनाप्राचुर्यं कारणमुपदिष्टं तेन ।
६ व्यासप्रत्ययार्थं नारदप्रदर्शितं कृष्णकथोद्भवं निजपूर्वजन्मचरितम् ।

तृतीयमुत्तमाधिकारप्रकरणम् ।

७ भागवतश्रोतुः परीक्षिज्जन्मप्रस्तावे सुप्तद्रौपदीपुत्रवधादि चौरकृत्यमश्वत्थाम्नः कथितम् ।
८ अश्वत्थाम्नोऽस्त्रात्कृष्णकृतं परीक्षिद्रक्षणं कुंतीकृता च तत्स्तुतिः ।
९ धर्मस्य शोके तच्छांत्यर्थं भीष्मसन्निधिगमनं तेन तच्छोकापनोदस्तन्निर्याणं च ।
१० युधिष्ठिरस्य राज्याभिषेकानंतरं भगवतो द्वारकागमनम् ।
११ भगवतो द्वारकाप्रवेशस्तदैश्वर्यकथनम् ।
१२ द्रौण्यस्त्राद्रक्षितस्य परीक्षितो जन्म युधिष्ठिरकृतस्य तज्जातकर्मणश्च वर्णनम् ।

अध्यायः

१३ सस्त्रीकस्य धृतराष्ट्रस्य विदुरोपदेशेन कुंत्या सह निर्याणं परीक्षिद्राज्याभिषेकश्च ।
१४ उत्पातदर्शनेन युधिष्ठिरस्यार्जुनागमचिंतायां तदागमनम् ।
१५ अर्जुनाद्भगवन्निर्याणं श्रुत्वा प्रव्रजितानां पांडवानां स्वर्गारोहणम् ।
१६ कलिखिन्नभूमिधर्मसंवादे परीक्षिदागमनम् ।
१७ उभयोः संवादात्कलिं ज्ञात्वा तन्निग्रहः परीक्षिता कृतः ।
१८ शमीककंठे राज्ञा क्षिप्तं मृतसर्पकलेवरं निशम्य तत्पुत्रेण शृंगिणा तस्मै शापोत्सर्जनम् ।
१९ गंगायां प्रायोपविष्टे परीक्षिति ऋषीणामागमनं शुकागमनं च ।

द्वितीयः स्कंधः । (साधनलीला । वामं चरणकमलम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथमं तत्त्वध्यानप्रकरणम् ।

१ राज्ञा पृष्टेन शुकेन तस्मै सूक्ष्मे ब्रह्मणि चित्तस्थैर्यार्थमादौ स्थूलविराड्रूपोपासनोपदेशः कृतः ।
२ स्थूलधारणाजितस्य मनसोऽतिसूक्ष्मे ब्रह्मणि लयोपदेशः ।

द्वितीयं हृत्प्रसादप्रकरणम् ।

३ विष्णुभक्तिश्रेष्ठत्वश्रवणेन तत्साधनभूतासु भगवत्कथासु परीक्षित आदरो दर्शितः ।
४ परीक्षिता हरिलीलाप्रश्ने कृते सति शुकेन वर्णितो नारदब्रह्मसंवादप्रस्तावः ।

अध्यायः तृतीयं मननप्रकरणम्

५ ब्रह्मणा नारदाय विराड्रूपसृष्टिकथनम् ।
६ पुरुषसूक्तार्थेन भगवतो विराड्देहवर्णनम् ।
७ वराहावतारादारभ्य आकृष्णावतारमवताराणां तत्तच्चरितोपेतानां वर्णनम् ।
८ जीवपरमात्मसंबंधाक्षेपपूर्वकं पुराणार्थप्रश्नाः ।
९ शुकेन परीक्षित्प्रश्नोत्तरे भगवता ब्रह्मणे प्रोक्तं चतुःश्लोकं भागवतमुपदिष्टम् ।
१० राज्ञः परीक्षितः प्रश्नानामुत्तरद्वारा शुकेन कृतं पुराणलक्षणादिवर्णनम् ।

तृतीयः स्कंधः । (सर्गलीला । दक्षिणं करकमलम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथममधिकारसृष्टिप्रकरणम् ।

१ गतायुषान्यदून् त्यक्त्वा गतस्योद्धवस्य विदुरेण सह समागमः संभाषणं च ।
२ कृष्णविरहदुःखितेनोद्धवेन संक्षेपेण क्षत्रे कृष्णचरितकथनम् ।
३ मथुराया आगतस्य भगवतो द्वारकाक्रीडादिवर्णनम् ।
४ भगवदादेशादुद्धवज्ञापितस्य विदुरस्य मैत्रेयसन्निधौ गमनम् ।

द्वितीयं गुणातीतसृष्टिप्रकरणम् ।

५ विदुरसंदेहे तन्निरासार्थं मैत्रेयेण कृतं महदादिस्थूलसृष्टिवर्णनम् ।
६ ईशशक्तिप्रवेशेन स्थूलभूतानां जगन्निर्माणशक्तित्वम् ।

७ स्वतो निर्गुणस्य भगवतो गुणसङ्ग्या मायया कथं संगः ? इत्यादि विदुरप्रश्नाः ।
८ नाभिकमलोद्भूतेन भीतेन ब्रह्मणा कृता भगवत्स्तुतिः ।
९ ततस्तपस्तुष्टस्य भगवतो वरदानेन ब्रह्मणः सृष्टिवृत्तिः ।

चतुर्थं कालसृष्टिप्रकरणम् ।

१० प्रथमं कालोत्पत्तेर्विसर्गसृष्टेश्च वर्णनम् ।
११ कल्पयुगादिकालमानवर्णनम् ।

पञ्चमं जीवसृष्टिप्रकरणम् ।

१२ ब्रह्मणः सनत्कुमारादिमानससृष्टेरनंतरं द्विधादेहभेदेन स्वायंभुवस्य शतरूपायाश्चोत्पत्तिः ।
१३ ब्रह्मणो नासिकोद्भूतस्य यज्ञरूपवराहस्य ब्रह्मादिभिः कृता स्तुतिः ।
१४ दितिप्रार्थनया कश्यपात्तस्यां गर्भसंभूतिः ।
१५ वैकुंठस्थिताभ्यां जयविजयाभ्यां सनकादिकुमारैर्दत्तस्य शापस्य वर्णनम् ।
१६ भगवत्कृतं कुपितकुमारसांत्वनं जयविजययोर्भगवदनुग्रहश्च ।
१७ हिरण्याक्षहिरण्यकशिप्वोर्जन्मन्युत्पातकथनं ताभ्यां कृतो दिग्विजयश्च ।
१८ धरोद्धारे हिरण्याक्षवराहयोर्महाभयमायोधनम् ।
१९ ब्रह्मप्रार्थनांगीकारेण भगवता वराहेण कृतो हिरण्याक्षवधः ।
२० सर्वस्थिरचरसर्गानंतरं स्वायंभुवमनोर्वंशवर्णनम् ।

षष्ठं तत्त्वसृष्टिप्रकरणम् ।

२१ कर्दमतपस्तुष्टेन भगवता तस्य सृष्ट्यर्थं कृतो विवाहोपदेशः ।
२२ स्वायंभुवमनुना स्वयंप्रत्तया देवहूत्या सह कर्दमर्षेर्विवाहः ।

अध्यायः
२३ पत्न्याः प्रसन्नेन कर्दमेन तपःसिद्ध्या विमाननिर्माणं तस्मिंश्च स्थितस्य सपत्नीकस्य तस्य गार्हस्थ्यवर्णनम् ।
२४ भगवतः कपिलस्य जन्मानंतरं कर्दमर्षेः प्रव्रज्या ।
२५ मात्रा पृष्टेन कपिलेन कृतं जीवबंधविमोचकभक्तियोगकथनम् ।
२६ पुंप्रकृत्योर्विवेकाय सर्वसूक्ष्मभावानां जन्मलक्षणम् ।
२७ पुंप्रकृत्योर्विवेकेन कपिलप्रदर्शितमोक्षप्राप्तिनिरूपणम् ।
२८ सगुणस्य भगवतो ध्यानयोगः ।
२९ मायाध्यासेन कालकृता जीवस्य जन्मादिघोरा संसृतिरुपदिष्टा ।
३० देहाध्यासेन जीवानां पापादधोगतिरुदीरिता ।
३१ पुण्यपापयोः साम्यान्मानुषी गतिः ।
३२ साध्विकैः कर्मभिरूर्ध्वगतिर्ज्ञानविहीनस्य च पुनरावृत्तिर्वर्णिता ।
३३ कपिलोपदेशेन ज्ञानप्राप्त्या मातुर्विदेहकैवल्यप्राप्तिरनंतरं कपिलस्य योगालंबनम् ।

चतुर्थः स्कंधः । (विसर्गलीला । वामं करकमलम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथमं धर्मप्रकरणम् ।

१ स्वायंभुवमनोर्वंशकीर्तनम् । ब्रह्मपुत्रादत्रेर्दत्तावतारः ।
२ विश्वसृजां सत्रे दक्षशिवयोर्वैरकारणं परस्परशापविसर्जनं च ।
३ दाक्षायण्याः सत्याः पितृयज्ञदिदृक्षया गच्छन्त्याः शिवेन कृतो निषेधः ।

४ शिवं विहाय गतायाः सत्याः पितृकृतावमानाद् योगेन देहत्यागः ।
५ नारदात् पत्नीनाशश्रवणेन कुपितशिवनिर्मितवीरभद्रेण दक्षयज्ञविध्वंसनं दक्षवधश्च ।
६ यज्ञसंधानार्थं दक्षजीवितहेतोः सर्वदेवसहितेन विधिना कैलासं गत्वा कृतं शिवस्तोत्रम् ।
७ पुनर्दक्षयज्ञसंधानार्थमुद्भूतस्य विष्णोः सर्वदेवैः कृता स्तुतिः ।

द्वितीयमर्थप्रकरणम् ।

८ सापत्नमातुः कोपादरण्यं गत्वा नारदोपदेशेन ध्रुवो हरिमतोषयत् ।
९ ध्रुवोऽभीष्टवरान्हरेर्लब्ध्वा पित्रा समर्पितं राज्यमकरोत् ।
१० पुण्यजनाद् भ्रातृवधं श्रुत्वा ध्रुवः पुण्यजनानलकां गत्वाऽवधीत् ।
११ पुण्यजनक्षयं दृष्ट्वाऽऽगतेन स्वायंभुवा कृतं ध्रुवस्य सांत्वनं युद्धात्परावर्तनं च ।
१२ पश्चात्कुबेरेणाभिनंदितो ध्रुवः प्रजापालनं कृत्वा यज्ञैरिष्ट्वा हरेः स्थानमारुरोह ।

तृतीयं कामप्रकरणम् ।

१३ ध्रुवान्वयोत्पन्नस्यांगस्य पुत्रवेनक्रौर्याददर्शनगमनम् ।
१४ अंगगमनादूर्ध्वं तत्पुत्रवेनस्य राज्याभिषेके कृते तस्याधर्मवर्तित्वाद् ऋषिभिर्वधः कृतः ।
१५ अराजके ऋषिभिर्वेनदक्षिणबाहुमथनेनोत्पादितस्य पृथोः पट्टाभिषेकार्हणादिकम् ।
१६ ऋषिप्रेरितमागधबंदिकृता पृथोः स्तुतिः ।
१७ क्षुत्पीडितानां शरणं प्राप्तानां प्रजानामन्नदानार्थं प्रस्तबीजां महीं हंतुमुद्यतस्य पृथोस्तया कृता स्तुतिः ।

अध्यायः

१८ महीवचनाद्वत्सपात्रादिकल्पनया सर्वैः कृतं महीदोहनम्।
१९ पृथोरश्वमेधे हयापहरणादिद्रवधोद्यतस्य पृथोर्ब्रह्मणा कृतं निवारणम्।
२० तद्यज्ञोद्भूतस्य विष्णोर्वरप्रदानमुभयप्रीतिसंबंधश्च।
२१ स्वप्रजाभ्यः पृथुकृतं भगवद्धर्मशासनम्।
२२ भगवदाज्ञया गतेन सनत्कुमारेण पृथवे ज्ञानोपदेशः कृतः।
२३ ध्यानयोगेन त्यक्तदेहस्य सभार्यस्य पृथोर्विमानेन वैकुंठप्राप्तिः।

चतुर्थं मोक्षप्रकरणम्।

२४ पृथोः प्रपौत्रात्प्राचीनबर्हिषो दशप्रचेतसां जन्म रुद्रगीतं च।
२५ तपस्यत्सु प्रचेतःसु तत्पित्रे नारदकृतोऽध्यात्मपारोक्ष्योपदेशः।
२६ पुरंजनापदेशस्य जीवस्य समृद्धित्यागात् संसृतेरुदीरणम्।
२७ प्रियापुत्रापदेशेंद्रियासक्त्या जीवस्य स्वरूपप्रच्युत्या कालक्रमेण जरारोगाद्यागमः।
२८ स्त्रीसंगात् स्त्रीत्वं प्राप्तस्य पुरंजनस्य परमात्मज्ञानोपदेशान्मुक्तिः।
२९ परोक्षार्थव्याख्यानेन स्त्रीसंगाद्धव ईशसंगान्मुक्तिरितीरितम्।
३० ईशाल्लब्धवराः प्रचेतसो वार्क्षीं कन्यां परिणीय राज्यमकुर्वन्।
३१ स्वसुते दक्षे राज्यधुरं न्यस्य वनं गतानां प्रचेतसां नारदोपदेशान्मुक्तिः।

पंचमः स्कंधः। (स्थानलीला। दक्षिणोरुः।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका।

प्रथमं कृष्णेन स्वरूपस्थितिप्रकरणम्।

१ प्रियव्रतस्य विरक्तत्वेऽपि ब्रह्मणो मनोधारणार्थं राज्यकर्तृत्वं तदनु नारदोपदेशात्परमपदप्राप्तिः।

अध्यायः

२ आग्नीध्रस्य स्वर्गं गंधर्वलोकावाप्तिश्च। तस्माज्जाभे राज्ञ उत्पत्तिः।
३ पुत्रार्थं यजतो नाभेर्यज्ञे भगवताऽऽविर्भूय तत्प्रार्थनयाऽऽत्मसदृशपुत्रदानम्, ऋषभावतारः।
४ इंद्रेण वृष्टिप्रतिबंधे स्वयोगमायया ऋषभस्य वर्षणादिचरितं तद्राज्ये प्रजानां परमनिर्वृतिश्च।
५ भरतादीनामुपदेश आत्मनश्चर्षभस्य परमहंस्यधर्माचरणम्।
६ देहाभिमानत्यागाग्निरभिमानत्वेन भुवं चरतस्तस्याग्निप्रवेशः।

द्वितीयं योगेन स्वरूपस्थितिप्रकरणम्।

७ भरतेन कृता यज्ञेश्वरस्य भगवतः स्तुतिः पश्चात्तस्य प्रव्रजनं तपश्च कथितम्।
८ विष्णुं भजतस्तस्यैणसंगादेणत्वं वर्णितम्।
९ तस्य तृतीयविप्रजन्मनि जडत्वेन गृहीतस्य चौरैर्बलिप्रदानाद् सद्यःकाल्या मोक्षः।
१० रहूगणेनाक्षिप्तस्यापि तस्य तथैव शिबिकावहनं तद्वाक्यकथनं च।
११ सिंधुसौवीरपतिना पृष्टेन तेन योगिना तस्मै कृतो ज्ञानोपदेशः।
१२ तत्संशयापाकरणेनाज्ञाननिवृत्त्या तज्ज्ञानप्राप्तिः।
१३ अविरक्ताय ज्ञानं व्यर्थमिति प्रदर्शनार्थं भवाट्व्युपदेशः।
१४ भवाटवीरूपकस्य वास्तवार्थकथनम्।

तृतीयं ज्ञानेन स्वरूपस्थितिप्रकरणम्।

१५ भरतवंशस्य सुमत्यंतस्य वर्णनं समाप्तिश्च।

चतुर्थं भूर्लोकस्थितिप्रकरणम्।

१६ जम्बूद्वीपवर्णनम्। तत्र मेरोः सर्वतो विस्तरस्य वर्णनं योजनप्रमाणादि।
१७ तस्माच्चतुर्दिक्षु गंगावतरणमिलावृते रुद्रेण कृता संकर्षणस्तुतिश्च।

अध्यायः

१८ मेरोः पूर्वादिक्क्रमतः खंडत्रयवर्णनम् ।
१९ किंपुरुषभरतखंडवर्णनं भरतखंडश्रैष्ठ्यप्रदर्शनं च ।
२० प्लक्षादिषड्द्वीपवर्णनं सप्त सागराणामंते लोकालोकमर्यादाविस्तारकथनं च ।

पञ्चमं द्युलोकस्थितिप्रकरणम् ।

२१ कालचक्रेण भ्रमतो रवेरन्वहं गतिमानं तद्रथवर्णनं च ।
२२ सोमशुक्रादिग्रहाणामूर्ध्वस्थितिमानं तद्गतिश्च ।
२३ ध्रुवपदादारभ्य ज्योतिश्चक्ररूपेण भगवतो विराड्देहकल्पनम् ।

षष्ठमधोलोकस्थितिप्रकरणम् ।

२४ सूर्याधस्ताद्राहोरारभ्य पातालादीनां भूविवराणां मानं लक्षणतः ।
२५ शेषसंस्थितिस्तन्मुखज्वालादिभ्यः प्रलयप्रवर्तनं च ।
२६ पापिनां यथायथं या नारक्यो गतयस्तासां कथनम् ।

षष्ठः स्कंधः । (पोषणलीला । वामोरुः ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथमं नामप्रकरणम् ।

१ भगवन्नाममाहात्म्यनिरूपणार्थमजामिलकथायां विष्णुयमदूतसंवादः ।
२ विष्णुदूतैर्नाममाहात्म्यं याम्यान्छ्रावयित्वाऽजामिलस्य विष्णुलोकनयनम् ।
३ यमेनापि वैष्णवोत्कर्षवर्णनैः कृतं स्वदूतसांत्वनम् ।

अध्यायः

द्वितीयं ध्यानप्रकरणम् ।

४ प्रजासिसृक्षया दक्षेण कृतस्य तपसोऽन्ते भगवदाविर्भावो हंसगुह्यस्तुतिश्च ।
५ हर्यश्वसंज्ञानां दक्षसुतानां नारदोपदेशाद्पुनरावर्तने नारदाय दक्षेण शापदानम् ।
६ दक्षस्य षष्टिकन्याप्रसवः । तद्वंशे विश्वरूपजन्म ।
७ बृहस्पतित्यक्तैर्देवैर्विश्वरूपस्य पौरोहित्याय कृतं वरणम् ।
८ विश्वरूपेणेंद्राय नारायणवर्मदानम् ।
९ इंद्रेण हते विश्वरूपे तत्पित्रा वृत्र इंद्र नाशार्थमुत्पादिते भीतैर्देवैर्भगवत्स्तुतिः कृता ।
१० भगवदुपदेशेन दधीचर्षेरस्थिभिर्निर्मितं वज्रमात्तवता सदेवेंद्रेण वृत्रस्य युद्धम् ।
११ वृत्रयुद्धे भक्तिज्ञानवैराग्यजुष्टानां तद्वाचां वर्णनम् ।
१२ विषण्णोत्साहितेनेंद्रेण कृतो वृत्रवधः ।
१३ वृत्रवधोत्पन्नया ब्रह्महत्यया नष्टस्येन्द्रस्य पुनरागमनमश्वमेधेन यजनं च ।
१४ वृत्रस्येदृग्भक्तिकारणप्रश्ने तत्पूर्वं चित्रकेतुजन्मकथनं तस्य कुच्छ्रलब्धसुते नष्टेऽतिशोकः ।
१५ चित्रकेतोर्नारदांगिरोभ्यां कृतः शोकापनोदः ।
१६ मृतपुत्रोक्तिभिस्तन्मायामपहापयित्वा नारदेन शेषतोषिण्या विद्यायास्तस्मै कृतोपदेशः ।
१७ शेषवरदानेन ऋद्धुन्मत्तस्य तस्येशहसनं तन्निदानेन पार्वतीशापात्तस्य दैत्यत्वम् ।

तृतीयमर्चनप्रकरणम् ।

१८ चतुर्थादित्यान्वयवर्णने इन्द्रकृतदितिगर्भच्छेदनादिना मरुत्पत्तिः ।
१९ कश्यपेन दित्यै कृतस्येंद्रहन्तृपुत्रोत्पादनसमर्थव्रतोपदेशस्य कथनम् ।

सप्तमः स्कंधः। (ऊतिलीला। दक्षिणं पाणितलम्।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका।

अध्यायः **प्रथममसद्वासनाप्रकरणम्।**

१ हिरण्यकशिपोर्ब्रह्मशापेन विष्णुभक्ते विरोधः।
२ भ्रातृवधसंतप्तानां बंधूनां हिरण्यकशिपुना कयोताख्यानेन कृतं सांत्वनम्।
३ हिरण्यकशिपोस्तपसा तप्तानां देवानां प्रार्थनया ब्रह्मणा तस्मै वरदानम्।
४ ब्रह्मणो लब्धवरेण दैत्येंद्रेण त्रैलोक्यं विजित्य विष्णुद्वेषेण कृतं देवपीडनम्।
५ गुरुशिक्षितमगृह्णानं भगवत्स्तुतौ रतं स्वपुत्रं प्रह्लादं पितुर्विषसर्पाद्यैर्घातयितुं यत्नः।

द्वितीयं सद्वासनाप्रकरणम्।

६ गुरौ गृहकर्मणि व्यग्रे प्रह्लादेन दैत्यसुतेभ्यः कृतो विष्णुभक्तिधर्मोपदेशः।
७ वनं प्रस्थिते पितरि स्वमातरं हंतुं प्रवृत्त इंद्रे नारदोपदेशेन निवृत्ते 'गर्भस्थ एव मन्मात्रे नारदोपदिष्टं ज्ञानमहमगृह्णाम्' इति तेन कृतो दैत्यसुतादेशः।
८ सुतं निघ्नतो दैत्यस्य हरिणा नृहर्यवतारधारिणा स्तंभादाविर्भूय हननं ब्रह्मादिभिः कृतं नृसिंहस्तवनं च।
९ तत्स्वरूपभीतेन ब्रह्मणा प्रणोदितेन प्रह्लादेन कृतं हरिस्तवनम्।
१० प्रह्लादमनुगृह्यांतर्हिते भगवति प्रसंगेन शिवात् त्रिपुरवध ईरितः।

तृतीयं मिश्रवासनाप्रकरणम्।

११ युधिष्ठिरपृष्टेन नारदेन युधिष्ठिराय कृतो नृणां तथा स्त्रीणां साधारणधर्मोपदेशः।
१२ ब्रह्मचारिवानप्रस्थयोर्धर्मप्राधान्येन चतुर्णामाश्रमाणां साधारणधर्मकथनम्।

अध्यायः
१३ साधकयतिधर्मकथनं सिद्धधर्मावधूतेतिहासेन च सिद्धधर्मावस्थावर्णनम्।
१४ देशकालादिविशेषेण गृहस्थाश्रमपरमश्रेयस्कृद्धर्मकथनम्।
१५ सर्ववर्णाश्रमनिबंधनस्य मोक्षलक्षणस्य च धर्मस्य सारतः संग्रहेण वर्णनम्।

अष्टमः स्कंधः। (मन्वन्तरलीला। दक्षिणः स्तनः।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका।

प्रथमं हरिसंस्मरणप्रकरणम्।

१ यज्ञावतारस्य तथा स्वायंभुवस्वारोचिषोत्तमतामसानां चतुर्णा मन्वंतराणां वर्णनम्।
२ त्रिकूटे गजीभिर्विक्रीडतो जलं पातुं तत्रस्थसरोऽवतीर्य लोडयतस्तुर्यमन्वंतरोक्त-गजेंद्रस्य ग्राहेण चरणे गृहीते सति तत्कृतं हरिसंस्मरणम्।
३ शमलं प्राप्तेन गजेंद्रेण स्तुतेन तन्मन्वंतरावतारेण हरिणा ग्राहग्रस्तस्य गजेंद्रस्य देवलशापतश्च ग्राहस्य विमोचनम्।
४ हरिप्रसादतो ग्राहस्य गंधर्वताप्राप्तिर्गजेंद्रस्य च पार्षदीकरणेन हरिपदप्राप्तिः।

द्वितीयं दानप्रकरणम्।

५ पंचमषष्ठमन्वंतरवर्णनप्रसंगादुर्वासःशापाब्धिःश्रीर्देवैः कृताया हरिस्तुतेः कथनम्।
६ भगवदाविर्भावानंतरं तदुपदेशतो देवैर्दैत्यानां संधिमभिधाय सुधोत्पादनार्थं कृतः समुद्रमंथनोद्योगः।
७ मंथनोद्भूतविषभयेन भीतैर्देवैः स्तुतेन रुद्रेण कृतं तद्विषपानम्।

अध्यायः
८ तदुद्भूतेषु चतुर्दशरत्नेषूत्पन्नया लक्ष्म्या हरिवरणम् । धन्वंतरेरमृते दैत्यैर्हृते भगवतो मोहिनीरूपाविर्भावः ।
९ तन्मोहितैर्दैत्यैरर्पितेऽमृतभाजने तान्वंचयित्वा सुरानमृतं पाययता हरिणा निजरूपग्रहणम् ।
१० एतत्कारणादेव दैत्यैरारब्धे युद्धे दैत्यपराजितैर्देवैः स्तुतस्य हरेराविर्भावः ।
११ नारदेन ब्रह्मणो वाक्याद्दैत्यवधपराणां देवानां युद्धान्निवारणं शुक्रेण च संजीविन्या जीवितानां दैत्यानां पातालप्रवेशः ।
१२ हरे मोहिनीरूपदर्शनोत्सुके सति हरिणाऽऽत्मनो मोहिनीरूपदर्शनेन तं धैर्यं त्याजयित्वा मोहं प्रापितस्य तस्य परिसांत्वनम् ।
१३ अवशिष्टानां सप्त मन्वंतराणां क्रमाद्वर्णनम् ।
१४ प्रतिमन्वंतरमाविर्भूतस्यावतारादिषट्कस्य प्रत्येकस्य कर्मणो वर्णनम् ।

तृतीयं स्वोक्तनिर्वाहप्रकरणम् ।

१५ शुक्राचार्येण बलेर्विश्वजिता याजनं तद्धेयेन च देवानां स्वर्गात्पलायनम् ।
१६ पुत्रनाशसंतप्तयाऽदित्या स्तुतेन कश्यपेन तस्यै कृतः पयोव्रतोपदेशः ।
१७ अदितिकृतपयोव्रतानुष्ठानतुष्टेन भगवता तत्तुष्टयै कृतस्तत्पुत्रत्वस्वीकारः ।
१८ अदितिप्रादुर्भूतस्य वामनबटोरखिलसम्भावनं बलियज्ञभूमिगमनं बलिना सत्कारपूर्वकं स्वाभीष्टवरवरणाय च तन्नियोजनम् ।
१९ पटवे वामनबटवे प्रतिश्रुतपदत्रयप्रमितपृथिवीप्रदानायोद्युक्तस्य बलेः शुक्राचार्येण कृतो निषेधः ।
अध्यायः
२० अनृताद्भीतेन बलिना गुरुणा शप्तेनाऽपि कपटं ज्ञात्वाऽपि हरये पदत्रयप्रदानं हरिवर्धनं च ।
२१ तद्धर्मनिष्ठां प्रथयितुं तस्य नागपाशैर्बन्धनम् ।
२२ प्रसन्नेन हरिणा सुतले तस्य प्रस्थापनं वरप्रदानेन च तद्द्वारपत्वस्वीकरणम् ।
२३ सुतलं याते बलावुपेंद्रस्येंद्रेण सह स्वर्गलोकगमनम् ।

चतुर्थं मत्स्यावतारप्रकरणम् ।

२४ प्रसंगान्मत्स्यावतारेण भगवता प्रलये कृतं मनो रक्षणम् ।

नवमः स्कंधः । (ईशानुकथालीला । वामः स्तनः ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

सूर्यवंशोपक्रमः ।

१ सूर्यसुतान्वये सोमवंशोद्भवार्थं मनुपुत्रसुद्युम्नस्त्रीत्वं, तस्यां बुधात्पुरूरवस उत्पत्तिस्तद्राज्यप्रतिष्ठा नाभागचरितं च ।

प्रथमं सूर्यवंशप्रकरणम् ।

२ मनोर्दशपुत्राणां मध्ये पंचानां पृषध्र-करूप-कवि-धृष्ट-नृगाणां वंशकथनम् ।
३ शर्यातेः कन्यायाः सुकन्यायाश्च्यवनपरिणयः । रैवतकन्याख्यानं तेन च बलाय कृतं कन्यादानम् ।

अध्यायः

४ नभगपुत्रस्यांबरीषस्य चरिते दुर्वासःकृत्यानाशः, सुदर्शनेन दुर्वासःपलायनं तत्पृष्ठतश्चक्रगमनम् ।

५ विष्णुचक्रसंतप्तस्य दुर्वाससोंऽबरीषेण चक्रस्तुत्या कृतं त्रासान्मोचनम् ।

६ इक्ष्वाकुवंशस्य शशादस्य चरितं, तत्पुत्रककुत्स्थचरितं, तदन्वये यौवनाश्वस्य मांधातुराख्यानं, तत्पंचाशत्कन्यकाभिर्वृतस्य च सौभरेराख्यानम् ।

७ तदन्वयोत्पन्नस्य हरिश्चंद्रस्याख्यानं तद्यज्ञे विश्वामित्रकृपया शुनःशेपमोक्षश्च ।

८ तदन्वयोत्पन्नसगरयज्ञे इंद्रेण हरिताश्वानयनार्थं प्रवृत्तानां सगरसुतानां कपिलेन दहनं, तत्पौत्रेणांशुमता च स्तुतेन कपिलेनाश्वं तस्मै दत्त्वा पितॄणामुद्धरणार्थं गङ्गावतरणाय कृतादेशः ।

९ तत्पौत्रेण भगीरथेन गंगामानीय कृतं स्वपितॄणामुद्धरणं, तदन्वये ऋतुपर्णोत्पत्तिः । सौदासाख्यानं तथा खट्वांगस्य मुहूर्ताद् ब्रह्मलोकगमनम् ।

१० तदन्वये दशरथाद्रामावतारः संक्षेपेण तच्चरितं च ।

११ रामराज्यवर्णनं, तद्यज्ञाः, शत्रुघ्नेन लवणासुरं हत्वा कृतं मथुरानिर्माणम् ।

१२ कुशादारभ्य सुमित्रांतस्य मनुवंशस्य कथनम् ।

१३ ऐक्ष्वाकस्य निमेर्वंशे जनकादीनां राज्ञां वर्णनं, वसिष्ठस्य निमेश्च परस्परं शापेन देहत्यागः ।

द्वितीयं सोमवंशप्रकरणम् ।

१४ इंदुना गुरुपत्न्यंगीकारे देवदैत्ययोर्युद्धोद्योगे ब्रह्मणा सांत्वितायास्तारायां बुधजन्म, तस्माद्बुधादिलायां पुरूरवसो जन्म, उर्वश्याख्यानम्, उर्वश्याश्च सकाशादायुरादीनां षण्णां पुरूरवसः पुत्राणां जन्म ।

अध्यायः

१५ पुरूरवसो वंशे जह्नोरुत्पत्तिः, गाधेर्विश्वामित्राख्याने परशुरामजन्म, सहस्रार्जुनवधश्च ।

१६ सहस्रार्जुनसुतैर्जमदग्नेर्वधे कृते तद्रोषात्क्षत्रियाणां वधेन परशुरामेण पृथ्व्या एकविंशतिवारं निःक्षत्रीकरणम् ।

१७ पुरूरवसश्चतुर्णां सुतानां वंशवर्णनम् ।

१८ नाहुषस्य ययातेर्देवयान्या सह विवाहः, तस्यां शर्मिष्ठायां च यदुतुर्वसुद्रुह्यनुपूरूणां जन्म, पंचसु कनीयसा पूरूणा च पितृजराग्रहणम् ।

१९ ययातेर्वैराग्यं, पूरो राज्याभिषेकानंतरं च वनाश्रयणम् ।

२० पितृप्रसादादाप्तराज्यस्य पूरोर्वंशे दुष्यंतशकुंतलयोर्विवाहोत्तरं तत्पुत्रस्य भरतस्याख्यानं तद्वंशे नष्टे यज्ञतुष्टैर्मरुद्भिस्तस्मै कृतं भरद्वाजपुत्रार्पणम् ।

२१ रंतिदेवाजमीढादेश्चरितं, दिवोदासोत्पत्तिः, अहल्याख्यानं, तस्याश्च शतानंदोत्पत्तिः ।

२२ दिवोदासवंशवर्णनम् । ऋक्षवंशे जरासंधपार्थदुर्योधनादीनामुत्पत्तिः ।

२३ अनुद्रुह्युतुर्वसुयदूनां यावज्ज्यामघसंभववंशकथनम् ।

२४ यादवान्वयोत्पन्नस्य विदर्भस्य नानासुखानां वंशानां रामकृष्णावतारावधि वर्णनम् ।

दशमः स्कंधः । पूर्वार्धम् । (निरोधलीला । हृदयम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथमं जन्मप्रकरणम् ।

१ वसुदेवदेवकीविवाहे स्वमृत्युं देवकीसुताद्विज्ञाय भीतेन कंसेन तत्पशुपुत्रहननम् ।

२ कंसादीनां घाताय ब्रह्मादिभिः प्रार्थितस्य हरेर्देवकीगर्भप्रवेशः, ब्रह्मादिकृतं गर्भस्तोत्रं देवकीसान्त्वनं च ।

अध्यायः

३ देवक्या निजरूपेणोत्पन्नस्य देवकीवसुदेवस्तुतस्य हरेर्भीतेन पित्रा गोकुले नयनम्।
४ कन्यकावाक्यादतिभयाकुलस्य कंसस्य दुष्टदैत्यैः सर्वबालवधप्रयत्नः।

द्वितीयं तामसप्रकरणम्। (२-१ तामसप्रमाणप्रकरणम्।)

५ कृतसूनुजातकर्ममहोत्सवस्य नंदस्य मथुरायां गमनं वसुदेवेन संगमश्च।
६ वसुदेववाक्याद् गोकुलेऽनर्थागमशंकितनंदस्य पूतनावधादिश्रवणेन विस्मितत्वम्।
७ श्रीकृष्णकृतः शकटासुरवधस्तृणावर्तवधश्च। तथा स्वमुखे निजमात्रे कारितं विश्वरूपदर्शनम्।
८ गर्गेण कृष्णजन्मकर्मादिजातककथनं, मृद्भक्षणव्याजेन कृष्णकारितं विश्वरूपदर्शनम्।
९ पयस्युत्सिक्ते कृष्णकृतं भांडभंगादि दृष्ट्वोलूखले यशोदाकृतं कृष्णबन्धनम्।
१० सहोलूखलेन रिंगता कृष्णेन यमलार्जुनभंजनं, तत्रत्यनलकूबरकृतं च कृष्णस्तोत्रम्।
११ वत्सान्पालयता कृष्णेन कृतं वत्सासुरबकासुरहननम्।

कल्पांतरलीलाप्रकरणम्। (क्षेपकप्रकरणम्।)

१२ महासर्पवपुर्धरस्याघासुरस्य वत्सगोपालगिलस्य गले प्रविश्य कृष्णकृतं हननम्।
१३ ब्रह्मणा वत्सगोपालहरणे तावद्रूपतामापन्नस्य हरेः पूर्ववद् गोकुले क्रीडा।
१४ कृष्णं परं ब्रह्म विदित्वा ब्रह्मकृतं तत्स्तोत्रम्।

(२-२ तामसप्रमेयप्रकरणम्।)

१५ कृष्णकृतं धेनुपालनं, तालवने धेनुकार्दनं कालियविषमृतवत्सबालकानामुज्जीवनं च।
१६ यमुनाह्रदे कृष्णकृतो कालियनिग्रहः, तत्पत्न्यभिष्टुतस्य च कृष्णस्य तस्मिन्ननुग्रहः।
१७ कालियं रमणके निर्वास्य सुप्तगोपानां दावाग्नितः कृतं रक्षणम्।
१८ वसंतगुणलक्षिते ग्रीष्मे बलरामेण कृतं प्रलंबासुरहननम्।

अध्यायः

१९ मुंजारण्यं गतानां गोपगवां श्रीकृष्णकृतं दावाग्नितो रक्षणम्।
२० गोपबलरामयुजो हरेर्वर्षाशरद्वतुक्रीडाया वर्णनम्।
२१ शरदि भगवतो वेणुनादं श्रुत्वा गोपीभिः कृतस्य वेणुगीतस्य वर्णनम्।

(२-३ तामससाधनप्रकरणम्।)

२२ कात्यायनीव्रतं कुर्वाणानां गोपकन्यानां परिहासेन कृष्णकृतं वस्त्रार्पणं यज्ञपत्नीभ्यश्च गोपप्रेषणम्।
२३ अनयाच्याभिषेण कृष्णस्य यज्ञपत्न्यनुग्रहस्तत्पतीनामनुतापश्च।
२४ इंद्रमखाद् गोपान्निवार्य कृष्णकारितं गोवर्धनमखमहोत्सवविधानम्।
२५ कुपितेंद्रे व्रजनाशाय वर्षति गोवर्धनमुद्धृत्य कृष्णकृतं गोपरक्षणम्।
२६ कृष्णपराक्रमशंकितेभ्यो गोपेभ्यो गर्गोक्तिमाश्राव्य नन्दकृतं तदैश्वर्यवर्णनम्।
२७ कृष्णैश्वर्यप्रबोधितेनेंद्रेण कृतं कृष्णवर्णनम्। कामधेन्वेन्द्रेण च कृतः कृष्णस्य गोराज्येऽभिषेकमहोत्सवः।
२८ वरुणभृत्यैर्वरुणलोकं नीतस्य नंदस्य भगवता तत्र गत्वा वरुणालयादानयनम्। गोपानां च वैकुंठदर्शनम्।

(२-४ तामसफलप्रकरणम्।)

२९ रासार्थमानीताभिर्गोपीभिर्हरेः संवादानंतरं रासे गोपीपार्श्वतो भगवदंतर्धानम्।
३० विरहतप्ताभिर्गोपीभिः कृतं कृष्णमार्गणं तासां तद्भावभावाकृतीनां च वर्णनम्।
३१ निराशाभिर्गोपीभिर्यमुनापुलिनमागत्य कृष्णस्यागमनहेतवे कृतेन गीतेन (गोपीगीतेन) तद्वर्णनम्।

अध्यायः

३२ गोपीनां विरहालापैराकृष्टचेतसा हरिणाऽऽविर्भूय कृतं तत्परिसान्त्वनं रासक्रीडा च।
३३ ताभिः सह श्रीकृष्णस्य जलस्थलवनक्रीडावर्णनम्।
३४ अंगिरःशापाज्जातेन सर्परूपेण गंधर्वेण ग्रस्तस्य नंदस्य कृष्णकृतं विमोचनं धनदानुगस्य शंखचूडस्य च वधः।
३५ वनं याते कृष्णे युग्मगीतेन गोपीनां वासरव्यतिक्रमः।

तृतीयं राजसप्रकरणम्। (३-१ राजसप्रमाणप्रकरणम्।)

३६ अरिष्टासुरवधे नारदोपदेशेन वसुदेवसुतौ रामकृष्णौ ज्ञात्वा कंसेन तयोरानयनायाक्रूरस्य गोकुलप्रेषणम्।
३७ केशिदैत्ये हते नारदकृतं भाविकर्मभिर्भगवत्स्तोत्रं भगवता च क्रीडता व्योमासुरहननम्।
३८ भगवंतं ध्यायतोऽक्रूरस्य गोकुलगमनं तत्र च रामकृष्णाभ्यां गृहं नीत्वा कृतः सत्कारः।
३९ मथुरां गच्छति कृष्णे गोपिकोक्तयः। अथ कालिंद्यामक्रूरस्य विष्णुलोकदर्शनम्।
४० कृष्णमीश्वरेश्वरं मत्वाऽक्रूरेण सगुणागुणभेदैः कृता तत्स्तुतिः।
४१ कृष्णस्य मथुराप्रवेशः, रजकहननं, मालाकाराय सुदाम्ने च वरदानम्।
४२ कुब्जार्पितचन्दनालंकारतुष्टेन कृष्णेन तदृजूकरणं कंसधनुर्भंगं विधाय तद्रक्षिणां कंससेवकानां च कृतं हननम्।

(३-२ राजसप्रमेयप्रकरणम्।)

४३ कुवलयापीडं हत्वा रंगं प्रविष्टयो रामकृष्णयोर्नरसाविर्भावश्चाणूरमुष्टिकादिभाषणं च।
४४ चाणूरवधानंतरं कंसवधः, तस्य स्त्रीणामाश्वासनं, पित्रोर्विमोचनम्, पितुर्जरासंधस्य दर्शनम्।

अध्यायः

४५ श्रीकृष्णेन पितृनंदादीनां परिसांत्वनम्। उग्रसेनस्य राज्याभिषेकः। भगवतो गुरुकुलवासे समाप्ते वरार्थं गुरवे तत्पुत्रं जीवंतं समर्प्य पुनर्मथुरागमनम्।
४६ गोकुल उद्धवं प्रेष्य तद्द्वारा गोपीनां सांत्वनं यशोदानंदयोः शोकापनोदनं च।
४७ उद्धवस्य कृष्णादेशेन गोपीभ्यस्तत्त्वज्ञानोपदेशो मथुरापुरीगमनं च।
४८ श्रीकृष्णस्य कुब्जया रमणमक्रूरगृहगमनमक्रूरस्य च पांडवानां देवज्ञानार्थं हस्तिनापुरप्रेषणम्।
४९ गजाह्वयं गतस्याक्रूरस्य पांडवेषु विषमशीलं धृतराष्ट्रं बुद्ध्वा पुनर्मथुरागमनम्।

उत्तरार्धम्।

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका।

(३-३ राजससाधनप्रकरणम्।)

५० कंसपत्न्योः कंसमृत्युकथनं, जरासंधस्य युद्धार्थं मथुरागमनम्। जरासंधं पराजित्य तद्भयादिव द्वारकां निर्माय तत्र रात्रौ हरिणा स्वजनारोपणम्।
५१ हरिणा मुचुकुंददृशा कालयवनदहनं मुचुकुन्दकृतस्तुत्या च हरेस्तस्मिन्ननुग्रहः।
५२ भयाद्भावतेव द्वारकामागतेन हरिणा कृतं द्विजमुखाद्रुक्मिणीसंदेशश्रवणम्।
५३ भगवतो विदर्भगमनं जरासंधादीनां द्विषतां च मिषतां सतां बलाद्रुक्मिणीहरणम्।
५४ शिशुपालपक्षगान् राज्ञो जित्वा रुक्मिणं विरूपयित्वा पुरे भैष्मीपाणिग्रहणम्।
५५ रुक्मिण्यामुत्पन्ने प्रद्युम्ने शंबरेण हृतेऽपि शम्बरं हत्वा सस्त्रीकस्य प्रद्युम्नस्य द्वारकागमनम्।
५६ स्यमंतकस्यात्मनि मिथ्यारोपं परिहरता हरिणा जांबवतो जांबवत्याः सत्राजितश्च सत्यभामाया आसादनम्।

अध्यायः (३-४ राजसफलप्रकरणम्।)

५७ पुनः शतधन्वनो वधात् प्राप्तं दुर्यशः परिमार्ष्टुं भगवताऽक्रूरान्मणिहरणम्।
५८ कालिंदी-मित्रविंदा-सत्या-भद्रा-लक्ष्मणानां पंचानां पाणिग्रहणम्।
५९ भौमं हत्वा तेनाहृताभिः षोडशसहस्रकन्याभिः परिणयः पारिजातस्य च दिवो हरणम्।
६० परिहासेन रुक्मिणीं कोपयित्वा कलहे कृष्णेन कृतं तत्परिसांत्वनम्।
६१ भगवतः पुत्रपौत्रादिसंततेर्वर्णनम्। अनिरुद्धविवाहे रामतो रुक्मिणो वधः।
६२ सहोषया रममाणस्यानिरुद्धस्य बाणासुरेण कृतं रोधनम्।
६३ बाणयादवसंगरे माहेश्वरेण ज्वरेण कृता भगवत्स्तुतिः, बाणासुरस्य बाहुच्छेदने रुद्रेण कृता भगवत्स्तुतिः, हरेस्तदनुग्रह ऊषयाऽनिरुद्धविवाहश्च।

चतुर्थं सात्त्विकप्रकरणम्। (४-१ सात्त्विकप्रमेयप्रकरणम्।)

६४ नृगं शापान्मुक्त्वा दक्षानां राज्ञां ब्रह्मस्वहरणे दोषप्रदर्शनम्।
६५ गोकुलमागतेन बलरामेण गोपीरमणं यमुनाकर्षणं च।
६६ आत्मरूपधरं मिथ्यावासुदेवं पौंड्रकं जित्वा तन्मित्रेण सुदक्षिणेन काशिपतिना कृताया कृत्यायास्तत्पुर्याः काशिकायाश्च सुदर्शनेन श्रीकृष्णकृतं दहनं तयोर्द्वयोः पौंड्रकसुदक्षिणयोरपि विध्वंसनम्।
६७ रैवतके पर्वते स्त्रीभिः सह रममाणेन बलरामेण द्विरदवानरहननम्।
६८ कौरवैर्युधि पराजित्य रुद्धे सांबे तन्मोक्षार्थमागतेन रामेण हस्तिनापुरकर्षणम्।
६९ प्रतिमन्दिरं भगवतो गार्हस्थ्यं दृष्ट्वा तुष्टस्य नारदस्य विस्मयतामापन्नत्वम्।
७० कृष्णस्याह्निकं, जरासंधनिगृहीतानां राज्ञां दूतप्रेषणं तदैव युधिष्ठिरनिमंत्रणं तयोः कार्यमंत्रविचारणम्।

अध्यायः (४-२ सात्त्विकसाधनप्रकरणम्।)

७१ भगवत्युद्धवमंत्रनिर्णयेनेंद्रप्रस्थं गते सति पाण्डवानां परमानन्दः।
७२ युधिष्ठिरेण कर्तव्ये राजसूये निवेदिते भगवदादिष्टेन भीमेन दुर्जयजरासंधहननम्।
७३ जरासंधनिगृहीतानां राज्ञां मोचनं सत्कारपूर्वकं च स्वे स्वे राज्ये प्रेषणम्।
७४ धर्मराजस्य राजसूयवर्णनं तथाग्रपूजाप्रसंगेन भगवन्निंदया तेन कृतश्चैद्यवधः।
७५ यज्ञावभृथसंभ्रमे सुयोधनस्याक्षांत्या मानभंगकथनम्।
७६ शाल्ववृष्णिमहारणे द्युमत्सेनगदया मूर्छितस्य प्रद्युम्नस्य रणान्निर्गमः।
७७ नानामायाविनं शाल्वं हत्वा कृष्णेन कृतं तस्य सौभविमानस्य खण्डनम्।

(४-३ सात्त्विकफलप्रकरणम्।)

७८ विदूरथदंतवक्त्रौ हत्वा श्रीकृष्णस्य पुरे क्रीडनम्। प्रसंगेन रामात्सूतवधः।
७९ बल्वलहन्तुर्बलरामस्य द्विजतुष्टये तीर्थस्नानाद्यैः सूतहत्यापापशांत्यर्थं यात्रा।
८० श्रीकृष्णाद्विधिवत्पूजामापन्नेन तन्मन्दिरगतेन सतीर्थ्येण श्रीदाम्ना सह तस्य मुदा गुरुकुलवासकथा।
८१ तत्पृथुकान्मक्षयित्वा तस्मै कृष्णेन कृतमतुल्यश्रीवितरणम्।
८२ कृष्णस्य यदुभिर्ग्रहणयात्रायां कुरुक्षेत्रगमनं, तत्र यदुभिः सह राज्ञां कृष्णकथा, गोपनंदगोपीभ्यश्च संमानपूर्वकमात्मज्ञानोपदेशः।
८३ कृष्णकथोत्सवे द्रौपद्या सह जल्पंतीभिः कृष्णस्त्रीभिस्तस्यै स्वस्वकरग्रहकथनम्।
८४ वसुदेवनारदसंवादानंतरं वसुदेवयज्ञमहोत्सवं वर्णयित्वा भगवत्कृतं सर्वेषामागतानां स्वगृहप्रेषणम्।

अध्यायः पञ्चमं गुणप्रकरणम् ।

८५ पित्रा संप्रार्थिताभ्यां रामकृष्णाभ्यां तस्मै ज्ञानमुपदिश्य मात्रे मृतपुत्रसमर्पणम् ।

८६ दंभाद्दुर्जुनकृतं सुभद्राहरणम् । भगवतो मिथिलायां प्रस्थानादिकम् । स्वभक्तयोर्नृपविप्रयोश्च सत्कारः ।

८७ नारायणनारदसंवादप्रस्तावाद्वेदैर्गुणालंबान्निर्गुणावधिः स्तुतिः कृतेति कथनम् ।

८८ विष्णुभक्तः कैवल्यपदभागर्वाग्देवताराधकस्तु संपदं प्राप्नोतीति निगदनम् ।

८९ 'को महान्देवः ?' इति संशये भृगुणा ऋषिभ्यः कथितं भगवतो विष्णोरुत्कर्षस्य वर्णनम् ।

९० संक्षेपेण कृष्णकथानिवेदनं यादवानां च सकारणं कुलानंत्यम् ।

एकादशः स्कंधः (मुक्तिलीला । मस्तकम् ।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका ।

प्रथमं जीवसुक्तिप्रकरणम् । (१–१ ब्रह्मभावप्रकरणम् ।)

१ कपटगर्भिणीनिमित्तेन सांबादिभिः प्रतारितैर्मुनिभिस्तेभ्यो भगवदिच्छया मौसलापदेशेन यदुकुलक्षयकृच्छापदानम् ।

२ नारदस्य पृच्छते वसुदेवाय निमिजायंतेयसंवादेन भागवतधर्मोपदेशः ।

३ निमिना माया तत्तरणं ब्रह्म कर्मेति चतुर्षु प्रश्नेषु कृतेष्वार्षभैर्मुनिभिस्तस्मै दत्तमुत्तरम् ।

अध्यायः

४ अवतारकथाप्रश्ने राज्ञा कृते द्रुमिलेन जायंतेयेनावतारकथनम् ।

५ भक्तिहीनानां का निष्ठा ? युगे युगे च कः पूजाविधिः ? इति च प्रश्ने निमये जायंतेयेन तत्प्रश्नद्वयस्योत्तरदानम् ।

(१–२ सायुज्यप्रकरणम् ।)

६ ब्रह्मादिभिः स्तुत्वा निजं पदं गन्तुं विज्ञापितस्य हरेरुद्धवेन स्वधामनयनार्थं कृता प्रार्थना ।

७ उद्धवस्यात्मज्ञानसिद्ध्यै हरिणा यदुप्रश्नेऽवधूतेतिहासोक्तगुरुष्वष्टगुरूणां वर्णनम् ।

८ अजगरादिभ्यो नवभ्यो गुरुभ्यः शिक्षितोपदेशमुद्धवस्य विवेकायावधूतगिरा हरिरकथयत् ।

९ कुरारादिभ्यो देहतश्चोपशिक्षितमवधूताच्छ्रुत्वा यदुः कृतार्थोऽभूदिति कृष्णकथनम् ।

१० देहसंबंधादात्मनः संसृतिः स्वतो नेति मतांतरनिरासतः कथनम् ।

११ भगवतोद्धवाय कृतो बद्धानां मुक्तानां साधूनां भक्तेश्च लक्षणोपदेशः ।

१२ सत्संगमहिमानमादिश्य कर्मानुष्ठातृणां तत्त्यागाधिकारिणां च प्रदर्शनम् ।

१३ सत्त्वगुणसेवया ज्ञानोदयक्रमो हंसेतिहासेन च चित्तगुणविश्लेषवर्णनम् ।

१४ भक्तियोग एव परं श्रेयो नान्यदिति तस्य साधनैः सह ध्यानयोगस्य च निरूपणम् ।

१५ अणिमाद्याः सिद्धयः ससाधना विष्णुपदप्राप्तौ विघ्नभूता इति कथनम् ।

१६ भगवदाविर्भावयुक्तानां विभूतीनां ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णनम् ।

अध्यायः

१७ स्वधर्मे भक्तिलक्षणे पृष्टे सति हंसोक्तस्य ब्रह्मचारिगृहस्थयोर्धर्मस्य वर्णनम्।
१८ सविशेषस्य वानप्रस्थयतिधर्मस्याधिकारिविशेषेण कथनम्।
१९ आश्रमधर्मतः पूर्वोक्तस्य ज्ञानादेर्दिङ्मोहादिवद् भ्रमकारित्वात्परित्यागकथनम्।
२० अधिकारिभेदेन गुणदोषव्यवस्थार्थं भक्तिज्ञानक्रियात्मकयोगोपदेशः।
२१ पूर्वोक्तयोगत्रयानधिकारिणां कामिनां द्रव्यदेशादीनां गुणदोषप्रकीर्तनम्।
२२ तत्त्वानां मतांतरेणाविरोधस्य, पुंप्रकृत्योर्विवेकस्य जन्ममृत्युप्रकारस्य च कथनम्।
२३ कदर्याख्यानेन तिरस्कारसहनोपायस्य, भिक्षुगीतेन धिया मनसः संयमस्योदीरणम्।
२४ आत्मनः सर्वभावानामागमापायचिंतया सांख्ययोगेन मनोमोहनिवारणम्।
२५ आत्मनो नैर्गुण्यज्ञानलाभाय चित्तप्रभवानां सत्त्वादिवृत्तीनामनेकत्वनिरूपणम्।
२६ दुष्टसंगेन योगनिष्ठाविघातः, साधुसंगेन तत्प्राप्तिरित्यैलगीतेन वर्णनम्।
२७ संक्षेपतः सद्यश्चित्तप्रसादकस्य सर्वकामाप्तिहेतोश्च क्रियायोगस्य सांगस्य कथनम्।
२८ पूर्वं विस्तरेणोक्तस्य ज्ञानयोगस्य सौकर्यार्थं पुनः संक्षेपेण स्वभक्ताय हरिणा कथनम्।
२९ पूर्वं विस्तरेण निरूपितस्य भक्तियोगस्य संक्षेपेण निगदनम्।

द्वितीयं ब्रह्ममुक्तिप्रकरणम्।

३० स्वधाम गंतुमिच्छता हरिणा प्रागुपक्षिप्तमौसलापदेशेन स्वकुलसंहारः।
३१ हरौ स्वधाम्नि प्रविष्टे सति वसुदेवादीनामपि देहत्यागेन तदनुगमनम्।

द्वादशः स्कंधः (आश्रयलीला। वामं पाणितलम्।)

श्रीमद्भागवतस्कन्धार्थप्रकरणाध्यायविभागसूचिका।

अध्यायः

प्रथमं कृष्णाश्रयप्रकरणम्।

१ मागधान्वये कलिप्रभावतः संकरादिमलीमसांतःकरणानां भाविनां राज्ञां निर्देशः।
२ कलिदोषवृद्धौ भगवता कल्क्यवतारेणाधार्मिकाणां नाशे पुनः कृतयुगागमः।
३ भूमिगीतं राज्ञां मोहादिवर्णनं तथा दोषभूयिष्ठे कलौ तदोषहन्त्र्या हरिस्तुतेर्निर्देशः।

द्वितीयं जगदाश्रयप्रकरणम्।

४ नैमित्तिकः प्राकृत आत्यंतिको नित्य इति प्रलयचतुष्टयप्रदर्शनं संसारनिस्तारश्च भगवत्कथयैवेति सिद्धांतः।
५ परीक्षितः संक्षेपतः परब्रह्मोपदेशेन तक्षकसंदंशान्मृत्युभयनिवारणम्।

तृतीयं वेदाश्रयप्रकरणम्।

६ परीक्षितेर्मोक्षः, तत्पुत्रजनमेजयस्य तक्षकरोषात्सर्पसत्रं, व्यासकृतवेदत्रयशाखाविभागस्तथा च गुर्ववज्ञया नष्टविद्यस्य याज्ञवल्क्यस्य सूर्याराधनतो वेदोपलब्धिः। यजुर्वेदसामवेदयोः शाखान्तरविभागः
७ अथर्ववेदविस्तारस्य, पुराणविभागेन तल्लक्षणादेर्भागवतश्रवणफलस्य च निगदनम्।

अध्यायः चतुर्थं भक्तिमार्गाश्रयप्रकरणम् ।

८ तपसि तिष्ठतो मार्कंडेयस्य कामादिभिरसंमोहस्तथा तत्प्रसादार्थमागतयोर्नरनारायणयोः स्तुतिः ।

९ भगवन्मायादिदृक्षोर्मुनेर्मिथ्याप्रलयदर्शनेन प्रलयाब्धौ वटपत्रस्थस्य शिशुभूतस्य भगवतो मुखे पौनःपुन्येन प्रवेशनिर्गमकथनम् ।

१० शिवेन मार्कंडेयाय कृतं वरप्रदानं तेन सह प्रीतिविधानं च ।

अध्यायः पञ्चमं भागवताश्रयप्रकरणम् ।

११ उपासनासिद्ध्यै महापुरुषवर्णनं तथा रवेः प्रतिमासं पृथग्व्यूहकथनञ्च ।

१२ भागवतोक्तार्थानां यथाक्रमं संक्षेपेण कथनम् ।

१३ पुराणप्रतिपाद्यदेवनमस्कारपूर्वकमष्टादशपुराणग्रंथसंख्यायाः, दानस्य, दानमाहात्म्यस्य श्रीमद्भागवतमाहात्म्यस्य च कथनम् ।

इति श्रीमद्भागवतस्कन्धाध्यायगतविषयानुक्रमणिका समाप्ता ।

श्रीकृष्णार्पणमस्तु ।